रमेशस्तुतिः

प्रातः स्मरामि वरकुण्डलशोभिगण्डं
शीतांशुमण्डलमुखं सितवारिजाक्षम् ।
आताम्रकम्रमुदिताधरबिम्बजृम्भि-
ध्यातृप्रहर्षकरहासरसं रमेशम् ॥ १॥

प्रातर्भजामि शुभकौस्तुभकम्बुकण्ठं
स्फीतात्मवक्षसि विराजितभूरिहारम् ।
भीतस्वभक्तभयभञ्जनपाणिपद्मं
शातोदरार्पितजगद्ग्रमब्जनाभम् ॥ २॥

प्रातर्नमामि शुभकिङ्किणिमेखलाङ्गं
पीताम्बरं करिकरोरुमुदारजानुम् ।
ख्यातांघ्रियुग्मरुचिरं जितकञ्जजात-
वातादिदेववरमौलिमणिं मुकुन्दम् ॥ ३॥

वादिराजयतिप्रोक्तं श्लोकत्रयमिदं शुभम् ।
प्रातःकाले पठन् मर्त्यः पापेभ्यः प्रविमुच्यते ॥ ४॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

रमेशस्तुतिः सम्पूर्णा

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु